श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

विल्लूर् नडादूर् श्री श्रीनिधेः कृतिषु

# ॥ अमृतशार्दूलम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ अमृतशार्दूलम् ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

मन्ये सप्तपयोनिधीनपि मुनिः पीत्वा तदुत्थामृतं
लावण्यादिरसास्पदं दिविषदामप्यन्ततो दुर्लभम्।
गूढं मातरि गुप्तमत्र तदिदं चक्रे तथा तत्पुनः
लोकेभ्यो विवृतं रहस्यमिति हि त्रातुं न शक्तास्स्त्रियः॥ १ ॥

यस्मिन् मन्दरपर्वतस्य वहनं साकं समैर्मन्थनं
भूयश्चाक्रमणं बलस्य च मतेर्दानं द्विषां मर्दनम्।
इत्येवं धिषणान्वितैश्च विबुधैः नास्माभिरभ्यर्थितं
नः स्वामिन्नमृतं भवेति विबुधैर्यद्दर्शिभिस्तप्यते॥ २ ॥

क्षीराब्धेरमृतं बभाविति परं जानन्ति मन्दास्सुराः
यत्किञ्चित्तदहो यदङ्गललितस्वेदद्रवाणां कणः।
तन्मध्ये पयसां निधेरपि तथा श्रीकुम्भघोणे पुरे
शेते मान्यमिदं विचित्रममृतं तत्त्वं तु विद्मो वयम्॥ ३ ॥

स्वर्गे भात्यमृतं यदर्थमभवं योद्धुं च यत्नान्वितः
धिङ् मां यद्रसनागतं वितनुते किञ्चिद्रुचिं चारुजः।
निर्युद्धं च वियत्नमत्र नगरे पीतं मया सर्वदं
तद्भातीति कृताञ्जलिर्यदमृतं पक्षीश्वरः सेवते॥ ४ ॥

कुम्भं नाम निधाय दुग्धजलधेस्तीरे सुराणां गणे
सक्ते तन्मथनाय हन्त भवतस्तत्कुम्भघोणान्तरा।
लीनः कुम्भमथो जहार स हरो मोक्तुं विषोत्थां व्यथां
तेनैवात्र भवान् स चात्र विदितः कुम्भेश्वरो वर्तते॥ ५ ॥

www.prapatti.com

दुग्धाब्धेर्मथनाय दैवतगणस्सोऽयं प्रवृत्तः पुरा
कुम्भान्तर्भगवन् भवन्तमकरोत् आवाहितं तं पुन।
अत्र स्थापयति स्म तत्र च भवं संरक्षकं संव्यधात्
तेनैषा किल कुम्भघोणनगरी कुम्भेश्वरोऽयं भव॥ ६ ॥

कुम्भं पूजयितुं च रक्षितुममुं योग्यं पुरारिं व्यधात्
सर्वज्ञं धृतगङ्गमेनमनघं कुम्भेश्वरोऽयं यतः।
स्वस्याथो बहुभिस्समैः कलयितुं पूजां स चालाभत।
सञ्जातो बहुधा स्वयं हि परित त्वां कुम्भगं सेवते॥ ७ ॥

स्वामिन् त्वद्वचसा विषं किल मया पीतं शिरो घूर्णते
त्वच्चित्तादमृतांशुमेकमुदितं कुर्यां शिरस्यञ्जसा।
इत्थं प्रार्थितलाभतोऽतिमुदितः शम्भुस्त्वनेकाकृतिः
नैकागारगतः पुरेऽत्र भगवन् त्वां सर्वतस्सेवते॥ ८ ॥

चन्द्रोऽयं तव मानसाद्यदभवत् जातोऽमृतांशुस्ततः
व्योम्नश्चापि पतन् मुहुर्मुहुरहो वारान्निधौ सर्वदा।
पङ्केनाङ्कितविग्रहो यश इदं धत्ते कलङ्कीत्यहो
भ्रष्टो विष्णुपदात् जलान्वयमपि प्राप्तः पुमानीदृशः॥ ९ ॥

शेषश्शब्दगणानुशासनचणो यत्तेन तस्मिन् भवान्
शेते हृष्टमना ममामृत विभो वेदाब्धिमध्योद्धृत।
वेदात्मा यदयं प्रभुश्च वयसां स्कन्धेऽस्य यास्यत्यतः
वेदे यो विहृतिं तदङ्गमथवा धत्ते स ते प्रीतये॥ १० ॥

तस्मादेव हि कुम्भघोणनगरे वेदेषु पारं गतैः
युक्ते वैदिकनामधेयमहिते शेते विमाने भवान्।
वेदं वेद्मि न वेदपुस्तकमहं हस्ते बिभर्म्यन्वहं
व्याजीकृत्य तदेव हे करुणया मां पश्य दृष्ट्या मनाक्॥ ११ ॥

शान्त्या नाम समृद्धमेकममृतं प्राचीनवाचोदितं
माधुर्यैकनिकेतनं मनसि यद्योगीश्वराणां स्थितम्।

दृश्यं मांसदृशामपीह जयति श्रीकुम्भघोणे पुरे
श्रीमत्कोमलवल्लिकापरिसरे श्रीवैदिकाख्ये गृहे॥ १२॥

पीत्वा हन्त विषं पयोधिकुहरात् जातं पुरारिः पुरा
नागैराभरणैश्च संवृततनुस्तप्तो नितान्तं ततः।
पर्याप्त्या विधुरं पिबन्निह दृशा कुम्भस्य घोणेऽमृतं
कुम्भं स्वीयमितीव संप्रकथयन् कुम्भेश्वरो वर्धते॥ १३॥

मर्यादाधिकमञ्जुताविहृतये क्रौर्यादिदूरात्मने
कर्याजीवनकर्मणि स्यदवते पुर्या निजायाः पुरा।
अर्यामोदविमर्दनैकरतये वर्याय दैत्यद्विषां
पर्याप्त्या रहितामृताय भवते कुर्यां सपर्यां सदा॥ १४॥

॥ इति अमृतशार्दूलं समाप्तम्॥

www.prapatti.com